श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ गोपालत्रिंशत् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ गोपालत्रिंशत् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

लीलायष्टिमनोज्ञदक्षिणकरो बालार्कतुल्यप्रभः
फालावेशितदिव्यरत्नतिलको मालावलीमण्डितः।
चेलावेष्टितमौलिमोहितजनश्चोलावनीमन्मथः
वेलातीतदयारसार्द्रहृदयो मे लालितो मौलिना॥ 1 ॥

नन्दानन्दकबालकं निरुपमं बृन्दारकाणां हितं
मन्दानाममरद्विषां दितिभुवां सन्दारणे सादरम्।
बृन्दारण्यविहारिणं नतिमतां सन्दायिनं सम्पदां
कुन्दाकाररदाभिरामवदनं वन्दामहे सुन्दरम्॥ 2 ॥

शोणाम्भोजलतामनोहरतमा घोणाग्रनृत्यन्मणिः
वीणाहस्तमुनीन्द्रवर्णितगुणा कोणांशनाम्नो दृशः।
बाणांस्त्वय्यतनोः क्षिपत्यतितरां एणाङ्कतुल्यानना
प्राणास्ते परमाद्भुतं स्मरपितः! शोणाब्जपत्रेक्षणा॥ 3 ॥

रक्ताम्भोजलताभिरामसविधं रक्तान्तरङ्गं ततः
भक्ताधीनमनोविलासविभवं मुक्ताविभूषोज्ज्वलम्।
वक्तारं यशसां धनञ्जयरथे युक्तात्मनां श्रीमतां
मुक्तावद्यमहं भजामि सुभगं सक्तात्मचित्तं नते॥ 4 ॥

सत्राजित्सहजप्रहारिहरिहा यत्राभवज्जाम्बवान्
तत्राद्रीन्द्रगुहागृहे रणमहासत्रातिथिस्संविशन्।
कुत्रास्ते दिवसैरियद्भिरिति यः पित्रादिभिश्चिन्तितः
सुत्रामादिसुपर्वबृन्दविनुतस्स त्रायतामामयात्॥ 5॥

नागाधीश्वरतुङ्गकोमलमहाभोगाधिरूढो हरिः
नागाधीश्वरखेदनादविवशो नागारिमारुह्य यः।
आगादाश्रितरक्षणप्रवणधीः वेगादतीवाकुलः
रोगान्मां स समुद्धरन् भवमयाभोगान् प्रदद्यान्निजान्॥ 6॥

राधाकृष्णपदांबुजेऽस्तु सततं मेधा मदीया रता
वेधा यद्धममाततान भगवान् द्वेधा ततो निर्गता।
आधारे जगतामनन्तमधुरे बोधामृतस्यन्दिनीः
गाधा नाम गृणातु येन भवतो बाधाविहीना जनाः॥ 7॥

वेदानां शिरसां गणेषु विहरन् खेदान्नतान् तारयन्
मोदादानकदुन्दुभेरवतरन् श्रीदारयुक्तो भुवि।
भूदाराङ्गविभूषणं हरिमणिर्मे दातुमत्रेप्सितं
पादाम्भोजमनाग्विलीनमनसश्श्रीदादिदेवस्तुतः॥ 8॥

सेवानम्रसुरासुरेन्द्रमकुटीभूवासपादाम्बुजं
रेवातातमनोहरात्मवदनं श्रीवासुदेवं भजे।
श्रीवाणीपतिमन्दताविहतये श्रीवाजिवक्त्रायितं
श्रीवार्धौ शयितं श्रितैकविवशं श्रीवारुणीपानुजम्॥ 9॥

मीनाकारजुषा त्वया यदुपते ! नानागमान्वेषिणा
मानातीतगुणौघरत्ननिधिना मानायकेन प्रभो !।
वीनामोदविधायिना गतिविधौ दीनावनं कुर्वता
गानावर्जितगोपिकाकुलवता हे नाथ ! रक्ष्या वयम्॥ 10॥

विद्यालालितपादपद्म ! भवता हृद्याकृतिं भेजुषा
    हृद्यालिङ्गितविग्रहेण सततं सद्यागसंसेविना।
पद्यानां निवहे कवीश्वरकृते गद्यावलौ वा स्थितिं
    नद्या भानुभुवस्तटे कलयता मृद्या ततिर्मेऽहसाम्॥ 11 ॥

गीता गोपपते त्वदब्जवदनोदीता सतां सन्ततिः
    प्रीता नाम यया विभाति नितरां धूताहिता सर्वदा।
सीता तत्र विलोकिता रिपुपुरे वाताङ्गजातेन या
    माता सैव समागतेति विदिता गीतापदेशादिति॥ 12 ॥

सोमाकारनिजास्यजातवचसा भीमानुजामोदकं
    कामारातिनताङ्घ्रिपद्मयुगलं कामादिदोषापहम्।
सामाद्यैर्निगमैस्सदा स्तुतपदं कामात्मजं तन्महः
    श्यामाम्भोधरकान्तिकान्तमनघं क्षेमाय मे जृम्भते॥ 13 ॥

भूषाभूषितविग्रहेण कमलायोषादृतस्वोरसा
    दोषानाथमुखेन भक्तजनतादोषानपाकुर्वता।
घोषानन्दकरेण चेष्टितगणैश्शेषानुजातात्मना
    भाषानाथनुतेन भातु घटिता सैषा मनीषा मम॥ 14 ॥

पारावारविशालशीतलपयः पूरावृते पत्तने
    माराकार ! विधाय वासमधुना नीरावृतेऽस्मिन् पुरे।
माराराातिमुखाभिवन्दित ! हरे ! सीरायुधानन्तर !
    श्रीराधामुखलोल ! पाहि विनतान् श्रीराजगोपाल ! नः॥ 15 ॥

धीराग्रेसरशौरिजात ! भगवन् ! कारागृहान्निर्गतः
    नीराढ्यां निशि तां विलङ्घ्य सहसा सूरात्मजातां नदीम्।
सारासारविवेकदूरवनिताजाराधिराजो भवन्
    श्रीरामानुज ! हे कृपारसमहावारान्निधे ! पाहि माम्॥ 16 ॥

प्रेयान् भीष्मकजाम्बवत्तनुभुवोः गेयानघश्रीनिधिः
स्वीयान् पालयितुं सदा कृतमतिः मायाकृताच्छादनात्।
मायाः श्रीदययैव दृष्टिविषयः कायाधवेनानतः
पायान्मामघतः पयोजनयनः श्रीयादवानां वरः॥ **17** ॥

धाराधरवराकारः धराधरधरः परः।
सुराधिपरुषो रक्षन् सुरभीस्सुखदोऽस्तु नः॥ **18** ॥

आकुलं गोकुलं वृष्ट्या शैलेनापालयत्स यः।
व्याकुलं मे कुलं शोकै बालकः पालयत्वयम्॥ **19** ॥

नन्दस्य मन्दिरे पूर्वं पार्थस्य स्यन्दने ततः।
नवनीतभुजे गीतानवनीतसृजे नमः॥ **20** ॥

नन्दस्य मन्दिरे गोभिः पार्थस्य स्यन्दने हयैः।
क्रीडतश्चरणन्यासैः रणन्यासैश्च ते नमः॥ **21** ॥

काचित्ते सविधे विभाति सरसी भद्रा हरिद्राभिधा
युष्मत्सद्मसमानमानमहिता सम्पूर्णनीरा सदा।
दृश्या भोगविमानमण्डपतनुप्राकारमध्यालया
क्षीराम्भोनिधिभामिनीव भवतस्सेवार्थमभ्यागता॥ **22** ॥

आस्यं ते मधुरं विभातु हृदये श्रीराजगोप ! प्रभो !
लास्यं यत्र विशालमुग्धवनिताविस्फारिताक्षीक्षितम्।
हास्यं तत्तदनेकभावविभवं भूयो विधत्ते शुभं
रास्यं श्रीरसपूर्णतादृशमहातीर्थे हरिद्राह्वये॥ **23** ॥

क्षेत्रं चम्पककाननं कथमिदं यच्चम्पकानोकहाः
भूयांसस्स्युरहो तदेव न परे वृक्षास्तु भूयस्स्थताः।

तस्मादेवमहं करोमि हृदये देवस्सहस्राकृतिः
श्रीमच्चम्पकनासिकस्तव वने मातर्हरिद्रे ! ततः ॥ 24 ॥

गोपालार्णवमध्यसद्मवसतिस्सोऽयं दिवा केवलं
रात्रौ नाम सह प्रियाभिरनघस्त्वन्मध्यसद्मस्थितः।
गोपीभिः परिवेष्टितो विजयते श्रीराजगोपालकः
तस्मादेव तवाभिधेति वितता मातर्हरिद्रेति नः ॥ 25 ॥

रात्रौ किं नु सदैव दैवतमणिस्त्वय्येव गोपीकुलैः
लिप्तैर्यत्सहरिद्रकुङ्कुमरसैः प्रीत्या समालिङ्गित।
काले सिक्ततनुश्च तैर्भवति यो भूयो हरिद्रारसैः
तस्मात्तत्त्वविदो वदन्ति भवती मातर्हरिद्रेति नः ॥ 26 ॥

भुजङ्गस्य निगूढस्य भुजङ्गस्य च कामदे !।
विषाननः पुरो व्यक्तः परोऽव्यक्तो मृषाननः ॥ 27 ॥

स्नातुं त्वत्सलिले मुहुर्मुहुरहो त्वत्तीरगे मण्डपे
कर्तुं चापि जपादिकं तव तथा शोभां च संवीक्षितुम्।
त्वत्तीरे वसतां सतां किल कुले दत्वा निजामात्मजां
त्यक्त्वा चापपुरीं सचापवडुवूर्वासी बभौ मत्पिता ॥ 28 ॥

मातर्हरिद्रानदि ! माननीये
श्रीराजगोपालविलासपूते।
श्रीराजगोपालपदाब्जसक्त -
स्वाम्यार्यमुख्याप्लवसेव्यतीर्थे ! ॥ 29 ॥

त्वदीयतीर्थे पतितं निशायां
घटेन सार्धं कलितापचारम्।
श्रीरामवत्त्वं करुणां प्रदर्श्य
मां काकवत् चाङ्गुलिहर्त्र्यरक्षः ॥ 30 ॥

त्रिंशत्पद्यमिदं स्तोत्रं कविश्रीनिधिना कृतम्।
त्रिंशद्दलमिवाम्भोजं कलानिधिमुदः पदम्॥ 31॥

॥ इति गोपालत्रिंशत् समाप्ता॥